AMARAKHAṆḌANA OF ŚRĪ HARṢA

BY

T. R. CHINTAMANI, M.A.,

Senior Lecturer in Sanskrit, University of Madras.

The Amarakhaṇḍana, the text of which accompanies this short paper, is attributed to Śrī Harṣa in the colophon. Who this Śrī Harṣa is, I have not been able to determine as yet. But it seems certain that he is not identical either with the author of the Ratnāvalī etc. or with the author of the Naiṣadha and other works. The present author quotes from recent writers and hence the conclusion stated above.

Two manuscript copies of this work are known so far. One belongs to the Adyar Library and the other to the Government Oriental Manuscripts Library. Both are in palm leaf and in the Telugu script. Both copies are full of scriptorial errors and the worst part of it is, that both agree in the mistakes. The differences in the reading I not have noted in the foot-notes for they are negligible. The text as printed below is full of mistakes and therefore only tentative. The main reason that induced me to publish such an incorrect text is the historico-literary importance of the work. The work purports to be an unfavourable review of the Amarakośa of Amarasiṁha. Whether the criticisms are sound or otherwise, I do not intend discussing in this paper. But I propose to draw attention to the numerous authors and works quoted therein and make only such comments on them as are absolutely necessary.

The following authors are referred to in the course of the work:—

1. Ajaya
2. Cakravarti
3. Gadādhara
4. Govardhana
5. Govindapāda
6. Hemacandra
7. Keśava
8. Keśavabhaṭṭa
9. Ko. Lākṣibhaṭṭācārya
10. Lokākṣibhaṭṭa
11. Mahendrācārya
12. Maheśvara Dīkṣita

13. Pārthasārathimiśra
14. Parvatavardhana
15. Pūrvācāryāḥ
16. Rabhasa
17. Saṅghabhaṭācārya
18. Sudarśanācārya
19. Sudarśanācāryabhaṭṭācārya
20. Sudarśanamiśra
21. Vajrakhaḍgabhaṭṭācārya
22. Vardhana
23. Viśvaprakāśikākāra

The following works are referred to:—

1. Bālabhāgavata
2. Bāṣkalabhāṣya
3. Candrikā
4. Kośaratna
5. Mañjarī
6. Mañjūṣā
7. Maṇi
8. Mucukundabhāṣyavivaraṇa
9. Nānārthacandrikā
10. Nānārthaśikhāmaṇi
11. Paryāyaratnamālā
12. Paryāyārṇava
13. Śābarabhāṣyavyākhyā
14. Śabdacandrikā
15. Śabdacintāmaṇi
16. Śabdamīmāṁsā
17. Śabdānuśāsana
18. Śabdaratna
19. Śabdarūpamīmāṁsā
20. Śabdaśabdārthacintāmaṇi
21. Śabdaśabdārthamañjarī
22. Śabdaśabdārthamañjūṣā
23. Śāradātilakabhāṣyavivaraṇa
24. Vaijayantī.

Among the authors referred to above, some are already familiar to us, but many are new. The following are worthy of our attention, on account of the fact that they are otherwise unknown to us:—

Cakravarti.

From the reference to Cakravarti on page 21, we are led to think that he is a lexicographer. But the name of his lexicon is yet to be found out.

Gadādhara.

It is not known whether this Gadādhara is the same as the famous Naiyāyika. He is here referred to as the author of a commentary on the Śābarabhāṣya.

Govardhana.

This Govardhana is a lexicographer. His lexicon is called *Maṇi.* Govardhana is referred to in other places also as a lexicographer.

Govindapāda.

There are two references to Govindapāda and both the references point to the fact that he ought to have composed some

rk on lexicography. The name of the work is however not en.

śava.

The only reference to Keśava is found on page 17. I have been able to trace this quotation either to the Nānārthārṇa-aṅkṣepa of Keśavasvāmin or the Kalpadrukośa of Keśava.

Lākṣibhaṭṭācārya.

This person is referred to as the author of a lexicon by name ndrikā. Even the name of the author is not quite clear, for re are one or two letters missing between Ko. and Lā. I am at present aware of any manuscript of the Candrikā of this known author.

kākṣibhaṭṭa.

Lokākṣibhaṭṭa is again an unknown lexicographer. A otation from the work of this author is found on page 26.

hendrācārya.

There are two references to Mahendrācārya in this work. e former of the two references informs us that Mahendrācārya he author of a work called *Mukukundabhāṣyavivaraṇa.* The ond reference may be to the same work or to a different one.

heśvara Dīkṣita.

The reference to Maheśvara Dīkṣita is in connection with the abhāgavata—a Kāvya, of which he is made out to be the hor.

rthasārathimiśra.

This Pārthasārathimiśra need not be confounded with the hor of the Śāstradīpikā. He is here the author of a lexicon name Śabdacintāmaṇi.

rvatavardhana.

A work called Śabdānuśāsana is here ascribed to the author-p of Parvatavardhana. So far as our knowledge goes at pre-t, we do not know of any person of this name as the author a Śabdānuśāsana. It is possible that the scribe has made a stake for Harṣavardhana.

Saṅghabhaṭācārya.

Saṅghabhaṭācārya was the teacher of this Śrī Harṣa, author of the Amarakhaṇḍana. He is here referred to as t author of a work called Śāradatilakabhāṣyavivaraṇa.

Sudarśanācārya.

We find this author as a lexicographer herein.

Sudarśanācāryabhaṭṭācārya.

This author has to his credit a work called Mañjarī-lexicon.

Sudarśanamiśra.

He too seems to have been a lexicographer.

Vajrakhaḍgabhaṭṭācārya.

He wrote a lexicon called Śabdaratna.

Vardhamāna.

Vardhamāna was the author of the Śabdopamānamīmāṃsā.

The following, among the works noted, are worthy of atte tion:—

Bālabhāgavata. See Maheśvara Dīkṣita.

Bāṣkala Bhāṣya.

Evidently this is some commentary on the Bhāṣk Saṁhitā of the Ṛg-Veda. We do not know whose bhāṣya referred to herein.

Candrikā. See Ko. Lākṣībhaṭṭācārya.

Kośaratna.

The name itself is suggestive of the contents. The aut is unknown.

Mañjarī. See Sudarśanācāryabhaṭṭācārya.

Mañjūṣā.

We do not know whether this a contracted name of Śabdaśabdārthamañjūṣā or a different work altogether.

Maṇi. See Govardhana.

Mucukundabhāṣya. See Mahendrācārya.

Nānārthacandrikā.

This is a lexicon of synonyms of unknown authorship.

Nānārthaśikhāmaṇi.

This is another lexicon of synonyms of unknown authorship.

Paryāyaratnamālā and *Paryāyārṇava.*

The former of these two works belongs to Maheśvaramiśra and the latter to Nīlakaṇṭhamiśra. Only manuscript copies of these works are available.

Śābarabhāṣyavyākhyā. See Gadādhara.

Śabdacandrikā. See Govindapāda.

Śabdacintāmaṇi.

On page 20, the author says that the work was composed by his father and on page 23 the name of the author of the Śabdacintāmaṇi appears as Pārthasārathimiśra. It would not be therefore too much to infer that Pārthasārathimiśra was the father of this Śrī Harṣa.

Śabdamīmāṁsā.

From the way in which the Śabdamīmāṁsā is referred to here, we are led to think that it is the work of Ajaya. We know that Ajaya has written the Nānārthasaṅgraha. Whether the present work is only another name of that work or whether it is different we cannot say.

There are two other references to the Śabdānuśāsana and one of them is certainly not Parvatavardhana's. About the other, we do not know at present.

Śabdaratna. See Vajrakhaḍgabhaṭṭācārya. There are 6 references to this work. Evidently it is a lexicon.

Śabdarūpamīmāṁsā. See Vardhanācārya.

Śabdaśabdārthacintāmaṇi.

This is a lexicon of unknown authorship. There are two references to this work here.

Śabdaśabdārthamañjarī.

This too is a lexicon of unknown authorship.

Śabdaśabdārthamañjūṣā.

Hamvīramiśrarāja is the author of this work. MS. copies of this work are available.

Śabdānuśāsana. See Parvatavardhana.

Śāradātilakabhāṣyavivaraṇa. See Saṅghabhaṭācārya.

Thus we see that in this short pamphlet a number of authors and works are quoted. Many of the works are not available at present. This is the only reason that induced me to publish this much defective text of the Amarakhaṇḍana.

॥ अमरखण्डनम् ॥

अतिचित्रमिदं हि चिन्त्यतां
विबुधैरप्यबुधातिजल्पितम् ।
रसवन्ति भवन्ति [?] तद्यथा-
मरसिंहस्य कृतिप्रकाशनम् ॥

तदिहैव विविच्यतेऽखिलं
शतशास्त्वेवमिति प्रबोधयन् ।
रसिकाः सरसी [?] कान्तमालस-
द्धृदयं ते सदयं पिबन्तु भोः ॥

यथा——'समाहृत्य' इत्यादौ । अयमाशयः——विपुलसंकुलप्राचीनग्रन्थ-शब्दवर्गे रूपभेदादिपूर्वकं बहुळनाम यावल्लिङ्गविशिष्टत्वेन ग्रन्थरचना क्रियत इति । एतद्रीत्यात्र न प्रतिमितीदं [?] न सम्यक् ॥

यथा वा——

"हय उच्चैःश्रवाः सूतो मातलिर्नन्दनं वनम्"

इत्यत्र

"हय उच्चैःश्रवा नीला शुभ्राङ्गी शक्रवाहनः ।
सूतोऽस्य मातलिः तिग्रः देवसारथिरित्यपि ॥
वनं च नन्दनं देवकाननं नन्दनामकम् ।
देवोद्यानं.................................... ॥"

इत्यादि **पर्यायरत्नमाला**रचितमस्ति नामबाहुल्यं हयादिना । किं च—

"मातलिर्मोकविस्तिप्रः सारथिस्तु हयङ्कषः" इति **रभसः** । एवमेव तत्र तत्र कोशेषु वर्तते । तट्टीकमेव [?] नामरचितमिति बहुळयावन्नामता नास्तीत्यस्य निबन्धनभङ्गः । न च संक्षिप्तपदेन तद्दोषपरिहार इति वाच्यम् ; तदपेक्षया विशेषपरिष्काराभावत् अश्रद्धेयत्वप्रसक्तेः । किं च इन्द्रादिपर्यायाणां प्रवचनात् तद्बाध किता [?] स्यात् । न च प्राचुर्यत्वेन प्रतिपादनमिति वाच्यम्; तस्याविवक्षितत्वात्, स्वारस्याभावात् ।

"पृथुरोमा झषो मत्स्यो मीनो वैसारिणोऽण्डजः"

इत्यादिषु बहुषु प्रतिपादितस्य व्यर्थतापत्तेश्च । अत एव—

"देवलोको देवनिधिः स्वर्गः स्वभुवनं परम् ।
राजालयं सौख्यनिधिर्निरर्गळशुभोदयः ॥

स्वर्लोकस्तूर्ध्वलोकः स्यादपलोदपलोदयः ।
मन्दरः सैरिकः शक्रभवनं खं दिवं नभः ॥"

इति **केशवः** ॥

"वराळी मेघनिलया सौख्याधारा सुखालया ।
दूर्वामरावती स्थूणा गुळूची त्वमरास्मृते ॥"

इति **विश्वप्रकाशिकाकारः** ॥

"शतकोटिर्भिदुर्वज्रं व्याधावः शतधारकम्"

इति **वैजयन्त्याम्** ॥

"वज्रोऽशनिर्गिरीकण्ठः पविर्दम्भोळिरक्षभम्"

इति **रभसः** ॥

"तारा भं रात्रिजं धिष्ण्यं सन्नक्षत्रमुडुर्न ना"

इति **वैजयन्त्याम्** ॥

"बलभद्रो बलश्चैव तस्य संवर्तकं हलम् ।
सौनन्दमस्य मुसलं खड्गस्तु खचितः..... ॥"

इति **वैजयन्त्याम्** ॥

एवं तत्र तत्र द्रष्टव्यम् । एतेन प्रतिसंस्कृतनिबन्धस्याजागळस्तनता व्यक्ता। किं च—

"उपेन्द्र इन्द्रावरजो माधवः श्रीपतिर्हरिः"

इत्यादिकं क्वचिदुक्तमेवेति पुनः स्मरीकरिष्यते । एवं चैतत्तात्पर्येणैव—

"..............दावस्तु दावो वनहुताशनः "

"पृषदश्वो गन्धवहो गन्धवाहानिलाशुगाः "

"······तारा तारकाप्युडु वास्त्रियाम् "

"रोहितो लोहितो रक्तः शोणः कोकनदच्छविः"

"निक्वाणो निक्वणः क्वाणः क्वणः क्वणनमित्यपि"

"भ्रकुंसश्च भ्रुकुंसश्च भ्रूकुंसश्चेति नर्तकः"

"अनादरः परिभवः परीभावस्तिरस्क्रिया"

"कौतूहलं कौतुकं च कुतुकं च कुतूहलम्"

"निम्नं गभीरं गम्भीरं ····················"

"खगे विहङ्गविहगविहङ्गमविहायसाः ।

शकुन्तपक्षिशकुनशकुन्तशकुनिद्विजाः ।

पतत्रिपत्रिपतगपतत्पत्ररथाण्डजाः ॥"

"द्राक्षा लाक्षा जतु क्लीबे···········"

"वाणिज्यं तु वणिज्यं स्यात्············"

इत्याद्युक्ता । एवं चात्र यावद्विकारवक्तृत्वस्य विषयत्वमिति स्फुट्यते । तथापि 'भाजनं पात्रम्' इत्यादिषु, नोक्तत्वात् क्वचित्प्रदेशप्रकाशनमितीदं कियदिति । प्रकृतमनुसरामः ।

किं च कोशस्तु द्विविधः, पर्यायनानार्थभेदात् । अत एव **पर्यायरत्नमाला, पर्यायार्णवः, नानार्थचन्द्रिका, नानार्थशिखामणिः, शब्दशब्दार्थमञ्जूषा** इत्यादिरूपेण लोकव्यवहारः । एष तु द्विविधरूपः सलिङ्गनिर्लिङ्गवर्गव्यतिरिक्तानां वर्गाणां पर्यायत्वात् अस्मिन् । अत एव—

"एकार्थवाचिशब्दानां पर्यायो मेळनं मत:"

इति **सुदर्शनाचार्यभट्टाचार्या** आहुः **मञ्जर्याम्** । एवं च तन्निबन्धनेनैव तत्कण्ठबन्धनं कुर्महे । किञ्चासङ्गतान्तरमत्रास्ति ।

"अमरा निर्जरा देवा जिष्णुरिन्द्रः शतक्रतुः"

इत्यादिना सामान्यविशेषाभावेन सर्वत्र प्रणीतमेव न्याय्यम् । नैर्ऋतिपर्यायार्थे "असुरा दैत्यदैतेयाः" इति सामान्यराक्षसपर्यायगणनाप्रस्तावे तत्पर्यायभूतान्—

"राक्षसः कोणपः क्रव्यात्क्रव्यादोऽस्रप आशरः
रात्रिंचरो रात्रिचरः......................॥"

इत्यादिशब्दान् विहाय विशेषगणनाया विशेषपुरस्कारेण नीतमिति तन्नियतिः किमु वक्तव्येत्यत्रोपरम्यते ॥

"स्त्रियां बहुष्वप्सरसः स्वर्वेश्या उर्वशीमुखाः"

इति यदुक्तं तदयुक्तम् ।

"अप्सरा चाप्यप्सराश्च किञ्चाप्सरस इत्यपि"

इति **मुचिकुन्दभाष्यविवरणे महेन्द्राचार्याः** । अत एव **भास्कलभाष्येऽपि** 'बहुत्वमप्सरादीनाम्' इतीदं सूचितम् इति **शारदातिलकभाष्यविवरणेऽप्य**स्मद्गुरवः **सङ्कभटाचार्या** अप्याहुः । एतदधिकं तत्रैव द्रष्टव्यं सूक्ष्मशेमुषीभिः । तत्सर्वं नोक्तमिति तदज्ञता स्फुटीकृता । न च तत्सोऽर्थ क्लैव[?]....र्गप्रदर्शनमेवं कृतमिति वाच्यम् । तथा चेत् "जातिर्जातं च सामान्यम्" "स्थलं स्थली" इति भणनमेव न स्यात् । तत्रापि तदैवेत्युक्तावपि अनवस्थादोषः । किञ्च विरिञ्चनादिपर्यायाणामेकपर्यायविकारकरणेनैव चारिताथ्यार्दन्येषामजागळस्तनता इत्येतावन्तग्रन्थविरोध एव स्फूर्जत्येवेत्यलं शोधितशोधितेन ॥

"तमस्तु राहुः स्वर्भानुः सैंहिकेयो विधुंतुदः"

इति यत्तदसत् । तम इति शब्दस्य लिङ्गनिश्चयाभावात् । न च "तमिस्रं तिमिरं तमः" इति वाक्यादत्रापि नपुंसकतैवोपेया । अत एव——

"रजो गुणेऽपि स्त्रीपुष्पे राहोर्वान्ते गुणः तमः"

इत्यभिधानान्तरम् । अतस्तत्रापि क्लीबतैवेत्युच्यत इति वाच्यम् । तर्हि "पूः स्त्री पुरीनगर्यौ वा" इत्यस्य व्यर्थतैव, पुरमित्युत्तरानुशासनात् । आस्तामेतत् । यदि रूपभेदेनोच्यते इत्युच्यमाने पुंस्त्वं तदा "रजो गुणेऽपि" इति कोशविरोधः । किञ्च तव मते पुंस्त्वानुशासनाभावात् अगत्या क्लीबतैवेति सिद्धम् ।

किञ्च—

"स्त्रियां नौस्तरणिस्तारिः" इत्युक्तेस्तरणिशब्दस्य स्त्रीत्वे क्तुसति ? सूर्यपर्यायतरणिशब्दस्यापि स्त्रीत्वमेव स्यात् । यद्वा वेना [?] त्रैव पुंस्त्वं वा स्यात् । अत्रोभयत्रापि लिङ्गैकत्वेन येन केनापि रचितं नः श्रुतं च । अतस्त्वेवमेतस्मिन् ग्रन्थे कल्पितुं न युक्तम् । तथानुशासनाभावादशास्त्रीयत्वेन मायतैवेत्यास्तां प्रसक्तानुप्रसक्त्या । प्रकृतमनुसरामः । तमः इति पुंलिङ्ग इति **महेन्द्राचार्याः** । उक्तं च **शब्दशब्दार्थमञ्जूषायाम्**—

"तमः पुंसि गुणे राहौ धूळिध्वान्तार्तवारिषु ।
तमा तमी तमाश्चापि ध्वान्तादिषु समीहिता ॥"

इति । अत एव तम इत्यादिकं पुंस्येव सम्यगिति मन्यतेऽस्मिन्नर्थे **सुदर्शनमिश्रैः** इति **शाबरभाष्यव्याख्याने गदाधरो**ऽप्याहेति तत्सिद्धम् ।

यत्तु—

"पीडा बाधा व्यथा दुःखमामनस्यं प्रसूतिजम्"

इति तन्न ।

"पीडा पीडश्च सम्मतः" इति **पूर्वाचार्याः** ।
"चूडा गूडा नडा पीडा स्त्रियां पुंसि च रूढितः"

इति **वज्रखड्गभट्टाचार्यो**ऽप्याह **शब्दरत्ने** । अत **एवास्मत्तातचरणैः शब्दचिन्तामणौ** "पुंसि पीडादिनाङ्कः पीडः" इति कथितम् । तस्मात्तथैव तदिति मन्तव्यम् ।

"महाक्षोणी भूमिः"

इति यत्, तन्न । अत्र इकारान्तईकारान्तयोः सत्त्वात् । यदाहुः—....
को लाक्षिभट्टाचार्याश्च चन्द्रिकायाम्—

"कर्ही मही सही क्षोणी मतिभूमिमहीमुखाः ।
ईकारान्ता इकारान्ताश्चेति सर्वज्ञशासनम् ॥"

इति । अत एव प्राञ्चः **शब्दानुशासने**ऽप्याहुः—

"ईकारान्ता इकारान्ता इकारान्तास्तथैव हि"

इति । एवं तत्र योज्यम् । अत एवान्येऽप्याचार्या आहुः—

"पुरः पुरा पुरं पुरी महिर्मही"

इत्यादिना ।

"हर्म्यादिर्धनिनां वासः"

इति यत्तदयोग्यम्, लिङ्गनिश्चयाभावात् । यदि पूर्वोत्तरपर्यालोचनया पुंलिङ्ग इति प्रवदति तर्हि तदप्यायासकरमेव ।

"हर्मि हर्मिश्च हर्म्यश्च हर्म्यं हर्म्याणि राड्गृहे"

इति **शब्दरत्न**पाठात् । अत एवाधुनिका अप्येवमाहुः । योज्यम् [?]

"निर्झरो झरः"

इत्यलिङ्गविशेषनिरूपणाभावाद्बाधकमेव ।

"झारि झरा झरी झारिः झारा झाराश्च निर्झरः"

इति **शब्दशब्दार्थमञ्जूषोक्तेः** ।

"स्त्रियः सुमनसः पुष्पम्"

इत्यत्र न सुमनस इति बहुवचनं युक्तम् ।

"सुमनः सुमनाः स्त्रियाम्"

इति **चक्रवर्त्युक्तेः** । किञ्च—

"सुमनः सुमनाश्चैव स्यात्क्रमात्पुंसि च स्त्रियाम्"

इति **केशवभट्टाचार्याः** । अत एव **शब्दरूपमीमांसायां** च **वर्धनाचार्यो**ऽप्याह—

"सुमनं सुमनः सुमनः बहुषु" इति ।

"पुष्पोऽस्त्री कुसुमम्"

इति **वैजयन्त्याम्** । न पुष्प·········तिनम् । किञ्च **सुदर्शनाचार्यो**ऽप्याह—

"पुष्पोऽन्त्री कुसुमे नीले घृतताळादिकेषु च" इति ॥

"नडस्तु धमनः पोटगळोथो कोशमस्त्रियाम्"

इत्यसत् ।

"नलोऽम्बुजे नलं न स्त्री धमनाख्यतृणेऽन्तिमः"

इति हेमचन्द्रः ॥

"स्याद्वीरणं वीरतरं..............."

तदसत् ।

"वीराङ्को वीरवृक्षः स्यात् वीरणश्चापि वीरकः"

इति पर्यायरत्नमालायाम् ॥

"गिरिका बालमूषिका"

इति यदुक्तं तन्न सम्यक् । बालमूषीति तस्य पुंस्त्वेन प्रयोगात् । यथा शब्दशब्दार्थमञ्जूषायाम्—

"गिरिका गैरिका चैव वसुमर्त्ता महेश्वरी ।
स्त्रीपुंसयोश्च बालीयमूषिका मूषकश्च सः ॥" इति ।

उक्तं च शब्दरत्ने —

"गिरिका मूषिका वत्से न क्लीबे गिरिका शिवा" इति ॥

"चटकः कलविङ्कः स्यात् तस्य स्त्री चटका तयोः ।
पुमपत्ये चाटकैरस्त्वपत्ये.......चटकैव हि ॥"

इति यत्तदसत्, एवमुक्तेः प्रयोजनाभावात्, एतत्प्रकरणेऽप्यनुक्तत्वादुक्तस्यापि निष्फलत्वात् । यद्येवमन्येषामूहितुमिति "गिरिका बालमूषिका" इत्याद्युक्तेः निष्फलतादिदोषबाहुल्यं स्यात् । तत्र बालमूषिकेऽप्यनुक्तत्वादित्यादिकं विचार-रमणीयं विवेकिभिः ॥

"कान्तार्थिनी तु या याति संकेतं साभिसारिका"

इति न समीचीनम् ।

"कान्ताथ संकेतगता कान्तेनापि समागता ।
स्यात्साभिसारिका नैव न क्लीबे दौत्यजन्तुषु ॥"

इति शब्दरत्ने । अत एव महेश्वरदीक्षितोऽपि बालभागवतेऽप्याह—

"कान्तं गता कान्तगता रहस्यात्साभिसारिका" इति ।

अपरे त्वालङ्कारिका एवमाहुः—

"पादाङ्गदं तुलाकोटिर्मञ्जीरो नूपुरोऽस्त्रियाम्" ।

इत्याहुर्यत्तदसत् [?] । तुलाकोटिशब्दस्य लिङ्गनिश्चयाभावात् । यदि मञ्जीरपदसाहित्यात् पुंस्त्वमिति वदति तर्हि,

"तुलाकोटिः स्त्रियां प्रोक्ता मञ्जीरेऽप्युडुके त्रिषु"

इति **कोशरत्नकृतनिर्णयस्य** व्यर्थता स्यात् ।

"स्त्रियां तुलाकोटिरासीत् मञ्जीरावर्तयोः पुमान्"

इति **गोविन्दपादाद्युक्तिवैषम्यं** प्रसज्येतेत्यलं खण्डनेन ॥

"तमालपत्रं तिलकं चित्रकं च विशेषकम् ।
द्वितीयं च तुरीयं च स क्लियामथ कुङ्कुमम् ॥"

इति यत्तदसत् ।

"फालाङ्कं चित्रकं दिव्यं तिलकं मुखमण्डनम् ।
तमालपत्रं प्रद्युम्नसहायं चापि नः क्लियाम् ॥"

इति **शब्दशब्दार्थचिन्तामणौ** प्रतिपादनात् ।

"स्मरः प्रियस्मरोद्योगचित्रकान्तिमनोहराः ।
विशेषकमुखाः शब्दसिलके क्लीबतापि च ॥"

इति **हेमचन्द्रोक्तेः** । अत एव **पार्थसारथिमिश्रोऽपि शब्दाचिन्तामणौ** आह—

"किञ्चापि चित्रकाद्याश्च तिलके पुंनपुंसकाः" इति ।
"तत्कालस्तु तथात्वं स्यादायतिः काल उत्तरः"

इत्यत्र आयतिशब्दस्य लिङ्गनिश्चयाभावात् अनुचितमेतत्प्रकरणादिना ; तदसिद्धेश्च; यदि "स्यात्प्रभावोऽपि चायतिः" इति नानार्थेषूक्तत्वात् तत्राप्रकरणात् स्त्रीत्वस्य क्लृप्तत्वेऽपि स्त्रीत्वमुन्नेयमिति, तर्हि प्रायश इति निबन्धनस्य निष्फलत्वं स्यात् । एतदुपलक्षकमित्युच्यमाने सर्वेषां पर्यायाणां लिङ्गादीनां च उपलक्षका इति

स्याताम् । एवं च "स्वरव्ययम्" इत्युक्त्यैव सर्वेषामुपलक्षकविधया सिद्धिवशाद्ग्रन्थमात्रोच्छेदः स्यादित्यलं धावनेन । एवं च तन्निबन्धनमेव तत्कण्ठबन्धनं जातमिति सूचितम् ॥

"निगळस्तु गळोद्देशे"

इति न सम्यक् ।

"निगाळश्च निगाळा च निगाळं च निगाळकम् ।
निगाळी च गळोद्देशे गळीये वाच्यवच्च तत् ॥" इति

शब्दशब्दार्थमञ्जूषायाम् । तत् उक्तशब्दजातमित्यर्थः ॥

"फलकोऽस्त्री फलं चर्म संग्राह्यो मुष्टिरस्य यः"

इति यत्तदसत् ।

"फलकस्त्रिषु विष्ण्वादौ फलकश्चर्मणि स्मृतः"

इति मञ्जूषायाम् ।

"शिलाभेदे चर्मणि च फलको सलेदेषु" [?] इति

गोवर्धनोऽप्याह मणौ ।

"दारुपात्रविशेषे च फालेऽश्मनि च चर्मणि ।
फलकः पुंसि वरदे फलकस्त्रिषु संमतः ॥" इति

शब्दरत्ने ॥

"प्रस्थानं गमनं गमः"

इति यत्तदसत् ।

"गमनं संगतं यानं प्रस्थानं च प्रचालनम् ।
प्रभाळिकादिशब्दाश्च पुंसि चेति विदुर्बुधाः ॥" इति

शब्दचिन्तामणौ ।

"गमनस्तु कळानाथे महेश्वरवसन्तयोः ।
प्रस्थाने बाहुळेये च पुंसि त्रिषु विकारिषु ॥" इति

पर्वतवर्धनोऽप्याह शब्दानुशासने ॥

"पांसुर्ना न द्वयो रजः"

इति न समीचीनम् ।

"शिरोवाचि शिरःशब्दो रजोवाचि रजस्तथा ।
शिरश्च रज इत्येव अकारान्ते च पुंसि च ॥" इति

शब्दशब्दार्थचिन्तामणौ ।

"रजस्तु पुंस्यकारान्तः पांसौ शंभौ ऋतावपि" इत्यादयः [?] ॥

"केतनं ध्वजमस्त्रियाम्" इत्याह यत्तदयोग्यम् ।

"केतनं पुंसि लशुने ध्वजे चन्द्रे च न स्त्रियाम्" इति

शब्दानुशासनात् ॥

"स्त्रियां कृषिः पाशुपाल्यं वाणिज्यं चेति वृत्तयः"

इति यत्तन्न विचारक्षमम् ।

"वाणिज्यं चापि वाणिज्या वाणीज्या इति संमता" इति

शब्दचन्द्रिकायाम् ।

"वृत्तौ प्रोक्ता च वाणीज्यं वाणिज्यापि च वाणिजम्" इति

गोविन्दपादाः ॥

"व्रीहिभेदस्त्वणुः पुमान्"

इति यत्तन्न मनोहरम् ।

"तृणोऽस्त्रि [?]....शुपुटके व्रीहिदुढादिकेऽपि [?]........च ॥" इति

शब्दरत्ने ।

"कणः कणं च लेशे स्यात् तृणोऽपि तृणमस्त्रियाम्" इति

शब्दशब्दार्थमञ्जूषायाम् ।

"कपिशं सस्यमञ्जरी" इत्यसत् ।

"कणिशः कण्टकः छन्नः पन्नलः सस्यमञ्जरी" इति

शब्दशब्दार्थमञ्जर्याम् ।

V—4

"कणिशं कणिशश्चैव कणीशी कणिशापि च" इति **शब्दचन्द्रिकायां** च ॥

"अयोऽग्रं मुसलोऽस्त्री स्यात्"

इत्यसंगतम् ।

"अयोऽग्रः कुन्तलादौ च मुसलादौ शरादिके" इति **शब्दरत्ने** ।

"अयोऽग्रोऽस्त्री शरादौ च मुसलादौ च संमतः" इति **लोकाक्षिभट्टश्च** ॥

"रुक्म कार्तस्वरं जाम्बूनदमष्टापदोऽस्त्रियाम्"

इत्यसत् । जाम्बूनदशब्दस्यापि पुंलिङ्गस्य सत्त्वात् । यदाह**ाजयः**—

"लोहाजोष्टापदो हेम जाम्बूनदमयानुकाः ।

क्लीबेऽप्येते च शब्दाः स्युरिति शास्त्रविदो विदुः ॥" इति **शब्दमीमांसायाम्** । अत एव **शब्दशब्दार्थमञ्जूषायां** च—

"हेम जाम्बूनदपदे पुंसि चाह्वविशेषकाः" इति ।

एवमश्मसारमधुच्छषकादीनां यथायोगं योजनीयं सूक्ष्मधीभिरित्युपरम्यते । एवममरनिबन्धनस्याशास्त्रीयत्वमिति सिद्धान्तितम् ॥

इत्थं विपक्षविबुधमस्तकन्यस्तसत्पदा ।
श्रीहर्षेण कृतं सन्तः पठन्त्व**मरखण्डनम्** ॥

॥ इत्यमरखण्डनम् श्रीहर्षविरंचितं समाप्तम् ॥